ISSN: 2456-9186, Vol. II, Issue. I, June-2018

वागर्थः

(An International Journal of Sanskrit Research)

Journal Homepage: http://cphfs.in/research.php



# दर्शनान्तरेषु शाब्दबोधसहकारिकारणत्वेनासत्तिस्वरूपविचारः

Abhijit Mandal
Assistant Professor of Department of Sanskrit
Cooch Behar Panchanan Barma University
Cooch Behar, West Bengal, India
Email: abhijitmndl14@gmail.com

**Abstract:** शब्द्यते इति शब्दः, शब्दाज्जातः शाब्दः, शाब्दश्चासौ बोधः शाब्दबोधः, शब्दनिष्ठशक्तिज्ञानजन्यबोध इत्यर्थः। पदविशेषोपस्थितेन पदार्थेन सह पदान्तरोपस्थितस्य पदार्थस्य यः संसर्गः, तस्य ज्ञानं शाब्दबोधः। शक्तिलक्षणान्यतरसम्बन्धेन आकाङ्क्षादिमतः पदादुपस्थितानां पदार्थानां यो मिथः सम्बन्धः तज्ज्ञानं शाब्दबोधः। अस्मिन् शाब्दबोधे पदज्ञानं, पदजन्यपदार्थस्मरणं, पदपदार्थयोः संसर्गात्मकं वृत्तिज्ञानम्, आसत्ति-योग्यता-आकाङ्क्षा-तात्पर्याणि चेत्येतानि कारणानि। अत्र तु पत्रे केवलमासत्तेः सहकारिकारणत्वविषये दार्शनिकमतान्तरानि प्रदर्शितानि। अस्याः स्वरूपविषये, लक्षणविषये, सहकारिकारणत्वविषये च विशेषतया वैयाकरण-नैयायिक-मीमांसकानां मतविरोधो, मतैक्यश्च संसूचितो मया। अपि चान्तिमे दार्शनिकमतानां तुलनात्मिका समीक्षा प्रदर्शिता ।

**Keywords:** शाब्दबोधः, पदज्ञानं, पदार्थज्ञानं, पदार्थयोः सम्बन्धः, सहकारिकारणम्, आसत्तिः।

## I. शाब्दिकनये आसत्तेः शाब्दबोधकारणत्वम्

आपूर्वकात्सद्धातोः क्तिन्प्रत्ययेन निष्पन्नोऽयमासत्तिशब्दो नैकट्यसम्बन्धं वक्ति। शाब्दबोधोपयोगिन्यामव्यवधानेन पदजन्यपदार्थोपस्थितौ अस्या आसत्तेस्तात्पर्यं विद्यते एव।

शाब्दबोधे आसत्तेरपि सहकारिकारणत्वं मन्यन्ते तज्ज्ञाः। आचार्यनागेशभट्टस्तदीये परमलघुमञ्जूषायामासत्तेः स्वरूपं निरूपयति आसत्तिनिरूपणप्रकरणे- "प्रकृतान्वयबोधाननुकूलपदाव्यवधानमासत्ति" रिति (परमलघुमञ्जूषा, आसत्तिनिरूपणम्) । अयमाशयः – प्रकृतेन सह योऽन्वयः सम्बन्धस्तस्य बोधो ज्ञानं तस्याननुकूलं प्रतिकूलं व्यवधायकं वा यत्पदं तेनाव्यवधानत्वं व्यवधानाभाव आसत्तिः। अतः प्रकृतान्वयबोधस्यानुकूलपदानामव्यवधानासत्तित्वाच्छाब्दबोधो जायते। तत्रासत्तिर्द्विविधा भवितुमर्हति –

प्रथमा हि – यत्र पदद्वयोर्मध्ये नास्ति कोऽपि व्यवधानं, तत्रान्वयबोधायाननुकूलपदव्यवधानस्य नास्ति काऽपि शङ्का। यथा 'गिरिरग्निमान्' इति। अत्र परस्परान्वयत्वं विद्यते पुनश्चात्रान्वयबोधाननुकूलपदस्य व्यवधानमपि नास्ति। अत्रासत्तित्वाच्छाब्दबोधो जायते। परन्तु 'गिरिर्भुक्तमग्निमान् देवदत्तेने'त्यत्र परस्परान्वयाभावादन्वयबोधाननुकूलपदस्य व्यवधानत्वाच्च शाब्दबोधो न भवति। वस्तुतोऽत्र वाक्यद्वयं विद्यते गिरिरग्निमान्, भुक्तं देवदत्तेन इति। यद्यपि 'गिरिरग्निमान्' इत्यत्र परस्परान्वयबोधोऽस्ति तथापि प्रस्तुतस्थले भुक्तमित्यन्वय-बोधाननुकूलपदस्य व्यवधानत्वान्न शाब्दबोधः। एवं भुक्तं देवदत्तेन इत्यत्र परस्परान्वयबोधोऽस्ति तथापि प्रस्तुतस्थले 'अग्निमान्' इति अन्वयबोधाननुकूलपदस्य व्यवधानत्वान्न शाब्दबोधः ।

द्वितीया हि – पदद्वयोर्मध्येऽन्वयबोधानुकूलपदस्य व्यवधाने तथा चान्वयबोधाननुकूलपदस्याव्यवधानाभावे आसत्तिवशात्कदाचिच्छाब्दबोधो जायते। यथा 'स्थाल्यामोदनं पचती'त्यत्र 'पचति' इति पदेन सह 'स्थाल्यामि'ति पदस्य परस्परान्वयत्वादत्र पदयोर्मध्ये ओदनमित्यन्वयाननुकूलपदस्य व्यवधानेऽपि शाब्दबोधो जायते। अत्र वाक्यघटितोदनमिति पदं प्रकरणत्वादनुकूलपदम्। अतो वाक्यार्थबोधे आसत्तेर्हेतुता विद्यत एव।

वस्तुतः सामान्यतया शाब्दबोधं प्रति वृत्तिज्ञानसहकृताकाङ्क्षावद्योग्यपदजन्यपदार्थोपस्थितिद्वारा पदज्ञानस्य कारणत्वं सुस्थिरमेव, परन्तु अनासन्नस्थले तथा योजनावाक्यस्थले वृत्तिज्ञानसहकृताकाङ्क्षावद्योग्यपदजन्य-

पदार्थोपस्थितिद्वारा पदज्ञानस्य कारणत्वे सत्त्वेऽपि शाब्दबोधेऽनुभवाभावाद् अन्वयव्यभिचारः स्यादिति प्राचीना आसत्तेरपि कारणत्वं स्वीकुर्वन्ति। आसत्तौ तु पदद्वयस्य अपेक्षा विद्यते। ययोः पदयोः परस्परान्वयजनकत्वे तात्पर्यं तयोः पदयोरव्यवधानमेवासत्तिः। आसत्तेर्भ्रमेणैव जायमान-शाब्दबोधोऽपि भ्रम इति प्राचीनाः कथयन्ति।

नागेशमते केवलं मन्दस्यैवाविलम्बेन शाब्दबोधे आसत्तिर्भवति कारणम्। आसत्तेः स्वरूपं तदीये लघुमञ्जूयामुच्यते यत्सा चासत्तिर्ययोर्द्वयोः पदयोर्मध्ये परस्परान्वयत्वं विद्यते तयोरन्वयप्रतियोगिपदार्थयोः तद्बोधकपदयोश्चाव्यवधानेन प्राथमिकतयोपस्थितिः। तदुक्तं – "सा चान्वयप्रतियोगिपदार्थानां तद्बोधकपदानां चाव्यवधानेन प्राथमिकोपस्थितिरूपा" (वैयाकरणसिद्धान्तलघुमञ्जूषा (प्रथमभागात्मिका) पृष्ठा -५२८) इति। येषां खलु बुद्धिः तीक्ष्णा भवति तेषां वक्तुरुच्चारितशब्दश्रवणादेव झटिति शाब्दबोधो जायते। अत्र तु प्रश्नः समायाति यत् – ननु गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ तु अनासन्नस्थले परस्परान्वयपदानामव्यवधानत्वात्कथं शाब्दबोधः? अत्र नागेशमतं तावदनासन्नस्थले तु 'गिरिरग्निवान् भुक्तं देवदत्तेने'ति योजनावाक्यादेव मन्दस्य बोधो जायते विलम्बेन। कथं नेति अमन्दस्येति उच्यते बुद्धिमतः पदजन्यपदार्थोपस्थितौ सत्यामाकाङ्क्षाज्ञानमात्रेण झटिति बोधो भवतीति तद्बोधे आसत्तेर्न कारणत्वं स्वीकृतं नागेशेन। स्वोक्तौ प्रामाण्यमाह – "ध्वनितं चेदं 'न पदान्त' इति सूत्रे भाष्ये" इति। "न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु" (पाणिनीयाष्टाध्याय्याः १-१-५८ सूत्रम्। ) इति सूत्रभाष्ये – "प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवदिति वक्तव्यम्...। आनुपूर्व्येण सन्निविष्टानां यथेष्टमभिसम्बन्धो भवति। तद्यथा – अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीरिति। तस्य यथेष्टमभिसम्बन्धो भवति – उदहारिभगिनि? या त्वं कुम्भं हरसि शिरसा अनड्वाहं साचीनमभिधावन्तमद्राक्षीरि"त्यत्र भाष्यकारस्यायमाशयो हि यद्यत्र तु पदानामानुपूर्व्यं नास्ति तत्रावश्यमेव स्वकीयबुद्धिद्वारा आनुपूर्व्यपाठः कर्तव्यः। इत्येवम्प्रकारेण भाष्यमतमुपस्थाप्या-चार्यनागेशेनासत्तेः कारणं निवारितं मन्दानां सकाशे।

## II. नैयायिकमते आसत्तेः शाब्दबोधकारणत्वम्

नव्यनैयायिकमतेनात्र मुक्तावल्यनुसारेणासत्तिनिरूपणं विधीयते- विश्वनाथन्यायपञ्चाननेनासत्तेः स्वरूपं यथाप्रतिपादितं –

"आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते।
कारणं, संनिधानं तु पदस्यासत्तिरुच्यते।।"

(विश्वनाथस्य भाषापरिच्छेदस्य कारिकासंख्या – ८२।) इति।

अत्रासत्तेरर्थं वक्ति सन्निधानमिति। शाब्दबोधे तु अन्वयस्य पूर्वपदं भवति प्रतियोगी, तथोत्तरपदञ्च भवति अनुयोगी। तयोः अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानं सान्निध्यमेव वासत्तिः। तस्या आसत्तेः ज्ञानं भवति शाब्दबोधे कारणम्। केचन एवं वदन्ति यत्कुत्रचित्पदानां परस्परव्यवहितेऽप्यव्यवधानभ्रमाच्छाब्दबोधो जायते। तेन तु 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यत्रातिव्याप्तिः स्यात्। अत्र 'गिरि'पदेन सह 'अग्निमान्' पदस्य तथा 'भुक्तं' पदेन सह 'देवदत्त'पदस्य सान्निध्यं तु अन्वयपदानामव्यवधान-तयासत्त्यभावेऽपि तात्पर्यज्ञानेन तस्य वाक्यस्य शाब्दबोधो जायते। अतो मुक्तावल्यां विश्वनाथेनोक्तं – "तात्पर्यगर्भा चासत्तिः" इति। तात्पर्यं गर्भे यस्या सेति व्युत्पत्त्या अव्यवधानस्य वाक्यस्य ज्ञाने तात्पर्यस्य प्रयोजनकता स्वीकरणीयैव। वस्तुतः प्राचीननैयायिका आसत्तिभ्रमाच्छाब्दबोधं स्वीकुर्वन्ति। अतो 'नीलः पटः' इति वक्तुः तात्पर्ये 'नीलो घटः द्रव्यं पट' इति प्रयोगे तु अन्वययोग्यपदयोः सान्निध्याभावादासत्तिभ्रमाच्छाब्दबोधोपपत्तिर्जायते। एवं सति आसत्तिभ्रमः शाब्दबोधभ्रमप्रयोजक इति प्राचीनमतस्य विप्रतिपत्तिः स्यात्। अत्र समाधानतया नव्यनैयायिकाः कथयन्ति यन्नासत्तिभ्रमः शाब्दबोधभ्रमं प्रति प्रयोजकः, अपि तु योग्यताभ्रमः तात्पर्यभ्रमश्च भवति प्रयोजकः। नव्यनैयायिकमते तु मौनिश्लोकादौ आसत्तेरभावाद्व्यतिरेकव्यभिचारवशादासत्तिज्ञानं न शाब्दबोधे कारणं भवति। यत्र त्वव्यवधानं विद्यते तत्र तु वृत्तिद्वारा पदजन्यपदार्थोपस्थितिरेव शाब्दबोधकारणम्। वस्तुतः पदजन्यपदार्थोपस्थितिरेवाव्यवधानकाले शाब्दबोधस्य जनका भवति, अतः पदजन्यपदार्थोपस्थितिरेवासत्तिः। पुनश्च बहुपदजन्यवाक्यार्थबोधस्यानुपपत्तेराशङ्का जायते। तद्धि अत्र "छत्री कुण्डली वासस्वी देवदत्तः" इत्यत्र बहुपदजन्यवाक्यस्यार्थावबोधः कथं स्यादुत्तरोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशत्वादव्यवधानेन तत्तत्पदस्मरणासम्भवात्। अत्र समाधानं तावत्प्रत्येकपदानुभवजन्यसंस्कारेणैव पूर्वपूर्वपदस्य स्मरणं जायते। तस्मात्पदविषयकस्मरणस्याव्यवधानेन नात्रापत्तिः। वस्तुतः समूहालम्बनज्ञानमेव शाब्दबोधे कारणं भवति।

## III. पूर्वमीमांसादर्शनेऽस्याः स्वरूपम्

पूर्वमीमांसकेषु कुमारिलभट्टमते पदार्थानां सन्निधिः शाब्दबोधे हेतुतया अभ्युपेतो भवति। तत्र मानमेयोदये शब्दप्रमाणे उच्यते

"अत्राकाङ्क्षा च योग्यत्वं सन्निधिश्चेति तत्त्रयम्।
वाक्यर्थावगमे सर्वैः कारणत्वेन कल्प्यते।।"

(नारायणद्वयीप्रणीते स्वामियोगीन्द्रानन्दसम्पादिते मानमेयोदये शब्दप्रमाणे ९२ संख्यकः श्लोकः।) इति।

स च शब्दैः सन्निहितत्वेन बोधितत्वात्पदार्थानां सन्निधिरित्युच्यते। अत्र पूर्वमीमांसकमते सन्निध्यभावस्य द्वे मते दृश्येते। कालकृतसन्निहितत्वाभावः शाब्दबोधितत्वाभावश्च। तत्र भिन्नकालोच्चारितयो'र्गामानय' इति पदयोः सन्निहितत्वाभावान्नान्वयः। अतः श्रोतुरर्थबोधनायावश्यमेव वक्त्राऽविलम्बेनैव पदयोरुच्चारणं विधेयम्। किञ्च, 'गां बधान' इत्यत्र बन्धनापेक्षस्य दृश्यमानस्याश्वस्य शाब्दबोधितत्वा-भावान्नान्वयः। अतः शब्दप्रतिपन्नानामेवान्वय इति नियमः सिद्धः। येषामेव प्रत्यक्षतया दर्शनं जायते तेषामेव शब्दबोधितत्वं भवति।

अत्र प्रभाकरस्य मतवैभिन्नं परिलक्ष्यते। आचार्यप्रभाकरः बुद्धिकृतसन्निधिमात्रमेव सन्निधिं स्वीकरोति। तस्यैव शाब्दबोधे कारणत्वं मन्यते। न तु शब्दसन्निधिम्। एवं सति शाब्दबोधे

विप्रतिपत्तिः स्यात्। 'गां बधान' इत्यत्र तु प्रत्यक्षोपस्थापित-स्याश्वस्यानन्वयं वारयितुं न शक्यते, अतः शब्दोपस्थापिता-र्थस्यैवान्वयो भवतीति नियमः स्वीकरणीयैव।

## IV. उत्तरमीमांसादर्शनेऽस्याः स्वरूपम्

वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रेणासत्तेः स्वरूपं प्रतिपाद्यते – "आसत्तिश्चाव्यवधानेन पदजन्यपदार्थोपस्थितिः" (वेदान्तपरिभाषा, आसत्तिनिरूपणम्।) इति। अतो न भिन्नकालोच्चारिताद् 'गामानय' इत्यादिकादन्वयान-नुकूलपदव्यवहितादपि 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यादिकाच्च शाब्दबोधो जायते पदजन्यपदार्थोपस्थितिरूपाया आसत्तेः सत्त्वात्, तत्र व्यवधानाभावो विद्यते। अव्यवधानमित्यस्य व्यवधानशून्यमित्यर्थः। अतो न हि केवलं पदजन्यपदार्थो-पस्थितिमात्रमासत्तिः, अपि तु अव्यवधानेन पदजन्यपदार्थो-पस्थितिरेवासत्तिः। तस्मादुक्तस्थले आसत्त्यभावान्न शाब्दबोधः। तर्हि कथं श्लोकादौ अन्वययोग्यपदानां व्यवहितत्वात् श्लोकार्थस्य प्रतीतिर्जायते? उच्यते यद्यपि श्लोकादौ अन्वयानुकूलपदानां व्यवधानाभावो विद्यते तथापि तत्र पदानामन्वयात् अव्यवधानस्य सम्भवोऽस्ति, अतः श्लोकाच्छाब्दबोधो जायते। अत्र पदजन्या नाम पदाज्जाता या पदार्थोपस्थितिः। उपस्थितिर्नाम स्मृतिः। स्मृतिस्तु अनुभवातिरिक्तं ज्ञानम्। उक्तञ्चाद्वैतसिद्धौ – "स्मृत्यनुभवाति-रिक्तञ्च ज्ञानं प्रमाणबलादायातमङ्गीकार्यमेवे"ति। अत्र तु पदजन्यपदार्थो-पस्थितेरेवासत्तित्वं स्यात् न तु पदजन्य-संस्कारस्यासत्तित्वम्। अत्र पदार्थस्योपस्थितिः पदजन्या एव स्यात्, न तु शब्दप्रमाना-तिरिक्तेन प्रत्यक्षानुमानप्रमाणादिना पदार्थोपस्थितिः। तथा सति अन्वयाभावात् शाब्दबोधाभावो जायते। ननु कथं न प्रत्यक्षप्रमाणादिनात्र पदार्थोपस्थितिः? तन्न। यदि अव्यवधानेन पदार्थोपस्थितिरासत्तिः स्यात् तर्हि घटोऽस्ति इति वाक्यश्रवणादेव प्रत्यक्षोपस्थापितस्य पटस्यापि शाब्दबोधे भानं स्यात्, परन्तु शब्देनानुपस्थाप्यस्य शाब्दबोधे विषयता न भवति। अतः पटस्य नात्र शाब्दबोधविषयता तस्य प्रत्यक्षेनोपस्थापितत्वादपि न शब्दानुपस्थाप्यत्वात्।

ननु अश्रुतस्थले किं स्यात्? अत्रोच्यते "अश्रुतस्थले तत्तत्पदाध्याहारः" (वेदान्तपरिभाषा, आसत्तिनिरूपणम्।) इति। वेदान्तपरिभाषायाः तात्पर्यं तावल्लक्षणे पदजन्येति पदयोजनया यत्र द्वारमिति केवलमुक्तं तत्र त्वर्थस्य सम्पूर्णताभावात्पिधेहि इति पदस्याध्याहारः करणीयः। पिधेहि त्वश्रुतपदम्। किञ्च, वैदिकक्रियाकलापेऽपि एवं दृश्यते यद् इषेत्वा इत्यादियजुर्वेदीयप्रथममन्त्रे छिनद्मि इति क्रियापदस्याध्याहारः भाष्यकारेण विहितः। तत्रैव दृश्यते- "अत एव इषेत्वा इत्यादिमन्त्रे छिनद्मि इति पदस्याध्याहारः। अत एव विकृतिषु सूर्याय जुष्टं निर्वपामि इति पदप्रयोगः" (वेदान्तपरिभाषा, आसत्तिनिरूपणम्।) इति।

## V. मतानां तौलनीकी समीक्षा

नैयायिका आसत्तेः कारणत्वं स्वीकुर्वन्ति। वस्तुतः पदार्थस्य शाब्दबोधात्प्राक् सर्वत्र व्यवधानाभावज्ञानस्य नियमेनाभावात् यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितो यस्तु तात्पर्यविषयप्रकारकनिश्चितविषयः तयोः पदयोरव्यवधानमासत्तिः, तज्ज्ञानं भवति शाब्दबोधे कारणम्। एवं सति गिरिर्भुक्तमग्निमान् देवदत्तेन इत्यादौ गिरिपदार्थभुक्तपदर्थयोः अन्वयस्य तात्पर्यविषयत्वाभावात् न् तयोः शाब्दबोधः। अपि च गिरिपदार्थाग्निमत्पदार्थयोरभेदेन अन्वयस्य तात्पर्यविषयत्वेन तत्पदयोरव्यवधानभ्रमे च तदर्थयोर्भेदान्वयबोधो भवत्येव। नैयायिकमते तु न आसत्तिभ्रमाच्छाब्दबोधभ्रमः।

उत्तरमीमांसकनव्यनैयायिकयोर्मध्ये मतविरोधोऽपि विद्यते। यत्र वेदान्तपरिभाषायामतं हि – पदात् अव्यवधानेन जाता पदार्थोपस्थितिरेवासत्तिः। तत्र भाषापरिच्छेदस्य मतं हि- न पदद्वयस्याव्यवधानमपि तु येन पदार्थेन सह यस्य पदार्थस्यान्वयोऽपेक्षितः तात्पर्यविषयीभूतः, तयोः पदयोः पदार्थयोरव्यवधानेनोपस्थितिरेवासत्तिः। वस्तुतः पदानामविलम्बे-नोच्चारमात्रमेव नासत्तिः, यतो हि अविलम्बेन पदोच्चारणे सत्यपि शक्तिज्ञानस्य विलम्बितत्वात्पदार्थस्य उपस्थितेर्विलम्बात्तत्काल एव न शाब्दबोधः। अतो नव्यनैयायिकमते आसत्तिर्न पदनिष्ठा, अपि तु पदार्थनिष्ठा।

वैयाकरणनागेशेन तदीये लघुमञ्जूषायामासत्तेर्लक्षणं निरूप्यते - "सा च अन्वयप्रतियोगिपदार्थानां तद्बोधकपदानां चाव्यवधानेन प्राथमिकोपस्थितिरूपा" (वैयाकरणसिद्धान्तलघुमञ्जूषा, आसत्तिनिरूपणम्।) इति। अत्र यदव्यवधानमिति पदं तत्तु केवलं शारीरिककृतमेव न तु कालकृतमव्यवधानम्। अतो लक्षणमिदमव्याप्तिदोषदुष्टम्। अव्यवधानस्य कालकृताभावे गामिति पदोच्चारणस्य त्रिप्रहरात्परम् आनय इति पदस्योच्चारणे परस्परान्वयत्वादपि न शाब्दबोधो जायते। अतोऽत्र लक्षणमेवं स्यात् "सा चान्वयप्रतियोगिपदार्थानां तद्बोधकपदानां च कालकृताव्यवधानेन प्राथमिकोपस्थितिरूपेति, तेन सामान्यतयाव्यधानस्योल्लेखत्वात्कालकृतस्यापि ग्रहणं जायतेऽतो न विप्रतिपत्तिः।

यत्र प्राचीनवैयाकरणा आसत्तेः सहकारिकारणत्वं स्वीकुर्वन्ति तत्र नव्यवैयाकरणनागेशादयो निराकुर्वन्ति। तदुच्यते "आसत्तिरपि मन्दबुद्धेरविलम्बेन शाब्दबोधे कारणम्। अमन्दबुद्धेस्त्वासत्त्यभावेऽपि पदार्थोपस्थितौ आकाङ्क्षादितोऽविलम्बेनैव बोधो भवतीति न बोधे तस्याः कारणत्वम्।" (परमलघुमञ्जूषा, आसत्तिनिरूपणम्।) इति।

ननु यत्र नागेशमते अमन्दबुद्धेरासत्त्यभावेऽपि पदार्थोपस्थितौ आकाङ्क्षाज्ञानवतो बोधोऽविलम्बेनैव भवतीति नासत्तिः शाब्दबोधे कारणं तथा च मन्दस्य सकाशेऽनासन्नस्थले योजनावाक्याद्बोधोऽविलम्बेन जायते तेन तु नागेशभट्ट आसत्तेः कारणत्वं निराकरोति तत्र कथं परमलघुमञ्जूषायां लक्षणकरणे प्रवृत्तिः? आद्यग्रन्थो लघुमञ्जूषा तत्रापि आसत्तेर्लक्षणं निरूपितं तत्रैव निवारितं स्यात्। परिणतवयसि परमलघुमञ्जूषायां लक्षणनिरूपणेन तस्य शाब्दबोधे कारणत्वं स्वीकृतमेव। किं बहुकेन, परमलघुमञ्जूषाया अव्यवधानमिति पदस्य साधारणतया व्यवहारत्वात्कालकृतस्य शारीरिकस्य चोभयोर्ग्रहणं जायते। यदि च आसत्तेः कारणत्वं न स्वीकृतं स्यात्तर्हि गाम् आनय इति पदद्वयोः विलम्बेनोच्चारणत्वादपि शाब्दबोधोपपत्तिः स्यात्। अतो

आपातदृष्ट्या वाक्यार्थबोधे यदासत्तेः कारणाभावत्वं प्रतीयते तत्तु न युक्तिसंगतम्, अत्र निराकरणेन ग्रहणमेव विहितम्। वस्तुतस्तु वाक्यार्थबोधे अवश्यमेवासत्तेः सान्निध्यस्य वा कारणत्वं स्वीकरणीयमेव। यथा गिरिर्भुक्तमग्निमान् देवदत्तस्य इत्यनासन्नस्थले मन्दस्यार्थबोधाय आसत्तेः कारणत्वं स्वीकरणीयं तथैवामन्दस्य कृतेऽपि। दुरूहश्लोकादौ तु अमन्दस्यापि वाक्यार्थबोधे विलम्बो जायते। तत्रापि मन्दबुद्धेरिव योजनावाक्यद्वारैव विलम्बेन श्लोकार्थस्य प्रतीतिर्जायते।

इयं चासत्तिः अर्थनिष्ठा एव, न तु पदनिष्ठा। पदनिष्ठायां सत्यां तु श्लोकादौ अन्वितपदयोरव्यवधानरूपसान्नध्याभावान्न शाब्दबोधः स्यात्। परन्तु श्लोकादौ तु योजनावाक्यद्वारा अर्थस्य परिनिष्पत्तिर्जायते। अत्र तु अर्थ एव प्रधानः। अतो न स्वरूपतया अपि तु ज्ञाततया एवासत्तेः कारणत्वं शाब्दबोधे विद्यते। अपि उपर्युक्तलक्षणादौ अव्यवधानपदस्यार्थः केवलं कालकृतव्यवधानाभाव एव स्यान्न तु पदकृतव्यवधानमन्यथा पदद्वयोर्द्विप्रहरसमयव्यवधाने उच्चरितत्वेनापि शाब्दबोधः स्यात्, श्लोकादौ तु पदकृतव्यवधानं विद्यते एव। यतो हि आसत्तिभ्रमान्न शाब्दबोधभ्रमः। अतो मन्मते तु तर्कसंग्रहकारस्यासत्तेः लक्षणं युक्तिसङ्गतं – “पदानामविलम्बेनोच्चारणं सन्निधिः” इति। न तु निराकाङ्क्षयुक्तपदानमपि तु आकाङ्क्षायुक्तपदाना-मेवाविलम्बेनोच्चारणरूपासत्तिरेव शाब्दबोधे कारणम्।

**संदर्भ ग्रन्थः**


[1]. ताताचार्यः, रामानुजः. शाब्दबोधमीमांसा (प्रथमखण्डः).नव-देहली:राष्ट्रिय-संस्कृत-संस्थानम्, २००५ (प्रथमसंस्करणम्).

[2]. नागेशः. परमलघुमञ्जूषा. ‘किरणावली’ संस्कृतव्याख्योपेत-हिन्द्यनुवादसहिता. सम्पा. आचार्य-लोकमणिदाहालः.वाराणसी: चौखम्बा सुरभारती प्राकाशनः, २०१३ (प्रथमसंस्करणम्).

[3]. नागेशः. वैयाकरणसिद्धान्तलघुमञ्जूषा (प्रथमभागः). श्रीमद्दुर्बलाचार्यविरचिता कुञ्जिका. श्रीमद्बालम्भट्टविरचिता कला इति टीकाद्वयेन संवलिता. सम्पा. मानवेन्दु-ब्यानार्जी.कलिकाता: संस्कृत-पुस्तक-भाण्डारः, २००४ (प्रथमसंस्करणम्).

[4]. नागेशः. वैयाकरणसिद्धान्तलघुमञ्जूषा (प्रथमभागः). सम्पा. रामप्रसाद-त्रिपाठी. वाराणसी: सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, १९९०(प्रथमसंस्करणम्).